# संस्कृत वार्ताः

**दिनाङ्क : 15/05/2026** **सायम् - 06:20**

**आदौ मुख्यवार्ताः**

- प्रधानमन्त्री नरेन्द्रमोदी तथा यु. ए. ई. देशस्य राष्ट्रपतिः शेख् मोहम्मद् बिन् जायद् अल् नह्यान् अबुधाबी-नगरे ऊर्जा-सहकारस्य द्विपक्षीय-व्यापारस्य च विषये चर्चां कृतवन्तौ। उभौ नेतारौ रक्षा, पेट्रोलियम, निवेशादि विषये प्रमुखानां सन्धिपत्राणाम् आदानप्रदानं कृतवन्तौ।
- एस्. जयशङ्करः षड्विंशत्यधिक द्विसहस्रतमे वर्षे ब्रिक्स् विदेशमन्त्रिमण्डलस्य सभायां प्रभावपूर्ण-बहुपक्षवादं प्रति भारतस्य प्रतिबद्धतां पुनः दृढीकृतवान्।
- एन. टी. ए. इति अभिकरणम् जून मासस्य एकविंशति दिनाङ्के षड्विंशत्यधिक द्विसहस्रतम वर्षस्य नीट यू. जी. परीक्षा पुनः आयोजयिष्यति; शिक्षामंत्री धर्मेन्द्र प्रधानेन परीक्षा-प्रक्रियायां निष्पक्षतां पारदर्शितां च आश्वासितम्।
- भाजपेति दलस्य विधायकः रथीन्द्र बसुः पश्चिमबङ्गालविधानसभायाः नूतनः सभा अध्यक्षः निर्वाचितः।
- बैडमिण्टन्-क्रीडायां भारतस्य सात्विक् साईराज् रङ्किरेड्डी, चिराग् शेट्टी इत्येतयोः शीर्ष-पुरुषयुगलं थाईलैण्ड्-ओपन्-क्रीडायाः उपान्त्यचक्रीय द्वन्द्वे प्रविष्टवान्।

**अथ वार्ताः विस्तरेण**

**प्रधानमन्त्री- यू.ए.ई.**

प्रधानमन्त्री नरेन्द्रमोदी संयुक्त-अरब-अमीरातस्य यूरोपीय-देशानां च षड्दिवसीय-यात्रायाः प्रथमचरणे अबुधाबी-नगरे अस्ति। यू.ए.ई.-देशस्य राष्ट्रपतिना शेख् मोहम्मद् बिन् ज़ायद् अल-नह्यान् इत्यनेन विमानपत्तने तस्य स्वागतं कृतम्, औपचारिक-सम्मानः च प्रदत्तः। यदा तस्य विमानम् एमिरती-वायुक्षेत्रं प्रविष्टम्, तदा संयुक्त-अरब-अमीरातस्य एफ-16 युद्धविमानेन तस्य अनुरक्षणं कृतम्। ततः परं प्रधानमन्त्रिणा मोदिना राष्ट्रपतिना शेख् मोहम्मद् बिन् ज़ायद् इत्यनेन सह विभिन्नेषु विषयेषु वार्ता कृता। पश्चिम-एशियायां प्रचलितेन द्वन्द्वेन सम्बद्धानां वैश्विक-आपूर्ति-समाह्वानानां मध्ये एषा वार्ता अभवत्। स्वस्य प्रारम्भिक-भाषणे प्रधानमन्त्रिणा श्रीमोदिना यू.ए.ई.-देशे सद्यः एव जातानाम् आक्रमणानां दृढतया निन्दा कृता।

राष्ट्रपतिं शेख् मोहम्मद् बिन् ज़ायद् इत्यमुं भ्रातेति सम्बोधयन् सः कठिन-समये यू.ए.ई.-नेतृत्वेन प्रदर्शितस्य धैर्यस्य प्रशंसाम् अकरोत्। सः अमीरात-देशाय भारतस्य समर्थनं पुनरपि प्रतिपादितवान् तथा च वर्तमान-वैश्विक-संघर्षस्य काले संवादः कूटनीतिः चैव एकमात्रः समाधान: अस्ति।

**जयशङ्करः**

विदेशमन्त्री डॉ. एस्. जयशङ्करः अवदत् यत् भारतं सर्वैः सहभागिभिः सह "परिणामकारि-बहुपक्षवादस्य" लक्ष्यस्य प्रगत्यै प्रतिबद्धम् अस्ति। नवदिल्ल्यां षड्विंशत्यधिक-द्विसहस्रतमवर्षस्य ब्रिक्स्-विदेशमन्त्रिमण्डलस्य द्वितीय-दिवसस्य मुक्त-सम्मेलनम् सम्बोधयन् डॉ. जयशङ्करः उक्तवान् यत् अस्य समूहस्य विस्तारितं सहभागित्वं द्रुतगत्या परिवर्तमानस्य वैश्विक सन्दर्भे बहुपक्षीय-सहयोगानां सुदृढीकरणाय सर्वेषां नेतॄणां महत्त्वबोधं प्रतिबिम्बयति। सः इदमपि अवदत् यत् अन्तर्राष्ट्रीय-वित्तीय-संरचनायाः परिष्कारः अत्यावश्यकः अस्ति। ततः पूर्वं डॉ. एस्. जयशङ्करः अद्य नवदिल्ल्यां इरान-देशस्य विदेशमन्त्रिणा अब्बास् अराघची इत्येनेन सह मिलितवान्। सामाजिक-पटले डॉ. जयशङ्करः अवदत् यत् उभौ नेतारौ पश्चिम-एशियायाः स्थितिं तस्याः प्रभावान् च चर्चितवन्तौ। द्विपक्षीय-विषयेषु परस्पर-हितसम्बद्ध-विषयेषु च मतानाम् आदान-प्रदानम् अपि अभवत्। ब्रिक्स्-विदेशमन्त्रिमण्डले षड्विंशत्यधिक-द्विसहस्रतमवर्षे श्री अराघची-वर्यस्य सहभागितायाः अपि तेन प्रशंसा कृता।

**जयशङ्करः क्यूबा**

विदेशमन्त्री डॉ. जयशङ्करः अद्य क्यूबा-देशस्य विदेशमन्त्रिणा ब्रूनो रोड्रिग्स् पारिल्ला इत्यनेन सह मेलनं विहीतवान्। सामाजिक-पटले प्रकाशिते सन्देशे डॉ. जयशङ्करः अवदत् यत् स्वास्थ्यं, विकास-सहभागित्वम्, क्षमता-निर्माणम् इत्यादिषु विषयेषु सहयोगसम्बद्धां चर्चाम् उभौ नेतारौ अकुरुताम्। उभयो: देशयोः विदेशमन्त्रालययोः मध्ये नियमित-परामर्शाय सहमति-पत्रस्य आदान-प्रदानम् अपि अभवत्।

**विराम**

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।**

**नीट-यूजी-एनटीए**

एनटीए इति अभिकरणेन घोषितं यत् षड्विंशत्यधिक द्विसहस्रतम वर्षस्य नीट-यूजी इति चिकित्सा-प्रवेशपरीक्षा जून मासस्य एकविंशति दिनाङ्के पुनः आयोजयिष्यते। इतः प्राक् अस्य मासस्य तृतीयदिनाङ्के आयोजिता परीक्षा कथितेन पेपर-लीक-इत्यनेन कारणेन निरस्ति कृता आसीत्, अपि च सी. बी. आई. अस्मिन् विषये अन्वेषणं कुर्वन् अस्ति। एन.टी.ए. अभिकरणेन अभ्यर्थिनां मातापितरौ केवलं एन्. टी. ए. इत्यस्य आधिकारिक-माध्यमानां आश्रयं कर्तुं प्रार्थितम्। अत्रान्तरे, केन्द्रीयशिक्षामन्त्री धर्मेन्द्र प्रधानः अद्य अवदत् यत् छात्राः सर्वकारस्य प्राथमिकता: सन्ति, केन्द्रम् तेषां विषये संवेदनशीलम् अस्ति। नवदिल्ल्यां प्रसार-माध्यमान् सम्बोधयन्, श्रीप्रधानः परीक्षा-प्रक्रियायां निष्पक्षतां पारदर्शितां च आश्वासितवान्।

शिक्षा मन्त्रिणा स्वीकृतं यत् एन्. टी. ए.-संस्थायां निश्चितपरिष्काराणां आवश्यकता अस्ति, तथा च भविष्ये अनियमिततां निवारयितुं परीक्षा-व्यवस्थां सुदृढं कर्तुं उपायान् वयं करिष्यामः। सः अग्रे अवदत् यत् नीट यू.जी. परीक्षा विद्यमानस्य ओ. एम्. आर्. आधारितस्य प्रकारस्य स्थाने आगामिवर्षात् सङ्गणक-आधारित-परीक्षायाः (सी. बी. टी.) प्रकारेण सञ्चालिता भविष्यति।

**भाजपा-रथीन्द्र बसु**

भाजपेति दलस्य विधायकः रथीन्द्र बसु इत्येषः पश्चिमबङ्गालराज्यस्य विधानसभायाः नूतनः अध्यक्षः निर्विरोध-रूपेण निर्वाचितः। अद्य प्रातः प्रो-टेम्-स्पीकर तपस रॉयस्य निरीक्षणे अस्य पदस्य निर्वाचनम् अभवत्। बसु वर्येण सद्यः एव आयोजिते विधानसभानिर्वाचने कूच बिहार दक्षिणतः भाजपेति दलस्य प्रत्याशी-रूपेण प्रथमं विजयं पञ्जीकृतम्। मुख्यमन्त्रिणा सुवेन्दु अधिकारिणा अधिकृतरूपेण श्रीबसु वर्यस्य नाम प्रस्तावितम्। सभया ध्वनिमतेन नियुक्तिं तस्य दृढीकृतम्।

**उपराष्ट्रपतिः**

उपराष्ट्रपतिः सी. पी. राधाकृष्णन्-वर्यः कार्यभारं ग्रहणानन्तरं श्वः प्रथमवारं सिक्किम्-राज्यं प्रति गमिष्यति। भ्रमणावधौ उपराष्ट्रपतिः गङ्गटोक्-नगरे सिक्किम्-राज्यस्य राज्य-दिवसोत्सवे भागं भजिष्यति। सिक्किम्-राज्यस्य राज्यपालः, मुख्यमन्त्री, केन्द्रीय-पूर्वोत्तर-विकास-मन्त्री अपि गङ्गटोक्-नगरस्य मनन-केन्द्रे आयोजिते कार्यक्रमे भागं ग्रहीष्यन्ति।

**बैडमिंटन**

बैडमिण्टन्-क्रीडायां भारतस्य सात्विक् सांई राज् रङ्किरेड्डी, चिराग् शेट्टी इत्येतयोः शीर्ष-पुरुषयुगलं थाईलैण्ड्-ओपन्-क्रीडायाः उपान्त्यचक्रीय द्वन्द्वे प्रविष्टवान्।

**आई. पी. एल. क्रिकेट्**

आई. पी. एल. क्रिकेट्-क्रीडायाम् अद्य सायङ्काले लखनऊ-नगरस्य एकाना-क्रीडाङ्गणे लखनऊ-सूपर्-जायण्ट्स् दलं चेन्नई-सुपर-किङ्ग्स दलं सम्मुखी करिष्यति। क्रीडायाः आरम्भः सायं सार्द्ध सप्तवादने भविष्यति। पूर्वं गतरात्रौ धर्मशाला-नगरस्य हिमाचल-प्रदेश-क्रिकेट्-सङ्घ-क्रीडाङ्गणे

मुम्बई-इण्डियन्स्-दलेन पञ्जाब्-किङ्ग्स्-दलं षट् स्तोभैः पराजितम्।

**॥ इति वार्ता: ॥**